## अचो यत्। (९७/२८४२)

अजन्ताद् धातोः यत् प्रत्ययो भवति। तकारो 'यतोऽनावः' (६.१.२१३/३७०१) इति[1] [2]स्वरार्थः। गेयम्। [3]पेयम्। [4]चेयम्। जेयम्। अज्ग्रहणं किं यावता हलन्ताण् ण्यतं वक्ष्यति ? अजन्तभूतपूर्वादपि यथा स्यात्, दित्स्यम्, धित्स्यम् (म.भा.२.८३)।

[२१३] तकिशसिचतियतिजनीनामुपसङ्ख्यानम्। (म.भा.२.८२)

तकि -- तक्यम्। शसि -- शस्यम्। [5]चति -- चत्यम्। यति -- यत्यम्। [6]जनि -- जन्यम्।

[२१४] हनो वा वध च। (म.भा.२.८२)

वध्यम्, घात्यम्॥

## पोरदुपधात्। (९८/२८४४)

पवर्गान्ताद् धातोः अकारोपधात् यत् प्रत्ययो भवति। ण्यतोऽपवादः। शप् – शप्यम्। लभ् – लभ्यम्। पोः इति किम् ? पाक्यम्। [7]वाक्यम्। अदुपधात् इति किम् ? कोप्यम्। गोप्यम्। तपरकरणं [8]तत्कालार्थम्। आप्यम्॥

## शकिसहोश्च। (९९/२८४७)

'शक्लृ शक्तौ' (धा.पा.१२६२), 'षह मर्षणे' (धा.पा.८५३), अनयोर्धात्वोः यत् प्रत्ययो भवति। शक्यम्। सह्यम्॥

## गदमदचरयमश्चानुपसर्गे। (१००/२८४८)

'गद व्यक्तायां वाचि' (धा.पा.५२), 'मदी हर्षे' (धा.पा.१२०९), 'चर गतिभक्षणयोः' (धा.पा.५५९), 'यम उपरमे' (धा.पा.९८५), एतेभ्यश्चानुपसर्गेभ्यो यत् प्रत्ययो भवति[9]। गद्यम्। मद्यम्। चर्यम्। यम्यम्। अनुपसर्गे इति किम् ? प्रगाद्यम्। प्रमाद्यम्। यमेः[10] पूर्वेणैव सिद्धे [11]अनुपसर्गनियमार्थं [12]वचनम्।

[२१५] चरेराङि चागुरौ। (म.भा.२.८३)

आचर्यो देशः। अगुरौ इति किम् ? आचार्य उपनेता॥

---

1. च इत्यधिकम् क. 2. विशेषणार्थः क. 3. नास्ति ड. 4. नास्ति फ. 5. चति नास्ति फ. 6. जनि नास्ति फ. 7. वाज्यम् ब. क. ड. 8. तत्कालावधारणार्थम् अ. ब. क. ड. 9. ण्यतोऽपवादः इत्यधिकम् फ. 10. च इत्यधिकम् क. 11. अनुपसर्ग नास्ति अ. फ. ह. 12. इदम् इत्यधिकम् ह.